# अध्यायः ५

# कर्मसंन्यासयोगः

**अवतरणिकाभाष्यम्**

“कर्मण्यकर्म यः पश्येत्” (गी ४.१८) इत्यारभ्य “स युक्तः कृत्स्नकर्मकृत्” (गी ४.१८) “ज्ञानाग्निदग्धकर्माणम्” (गी ४.१९) “शारीरं केवलं कर्म कुर्वन्” (गी ४.२१) “यदृच्छालाभसन्तुष्टः” (गी ४.२२) “ब्रह्मार्पणं ब्रह्म हविः” (गी ४.२४) “कर्मजान् विद्धि तान् सर्वान्” (गी ४.३२) “सर्वं कर्माखिलं पार्थ” (गी ४.३३) “ज्ञानाग्निः सर्वकर्माणि” (गी ४.३७) “योगसंन्यस्तकर्माणम्” (गी ४.४१) इत्यन्तैर्वचनैः सर्व-कर्म-संन्यासम् अवोचद्भगवान्। “छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ” (गी ४.४२) इत्यनेन वचनेन योगं च कर्मानुष्ठान-लक्षणम् अनुतिष्ठेत्युक्तवान्। तयोरुभयोश्च कर्मानुष्ठान-कर्म-संन्यासयोः स्थिति-गतिवत् परस्पर-विरोधाद्,

एकेन सह कर्त्तुमशक्यत्वात्, काल-भेदेन चानुष्ठान-विधानाभावादर्थाद्, एतयोरन्यतर-कर्त्तव्यता-

प्रा’’ौ सत्यां यत्प्रशस्यतरमेतयोः कर्मानुष्ठान-कर्म-संन्यासयोः तत्कर्त्तव्यं नेतरदित्येवं मन्यमानः

प्रशस्यतर-बुभुत्सया अर्जुन उवाच - “संन्यासं कर्मणां कृष्ण” इत्यादिना।।

**आक्षेपः**

ननु चात्मविदो ज्ञान-योगेन निष्ठां प्रतिपिपादयिषन् पूर्वोदाहृतैर्वचनैर्भगवान् सर्व-कर्म-

संन्यासमवोचत्, न त्वनात्मज्ञस्य। अतःश्च कर्मानुष्ठान-कर्म-संन्यासयोर्भिन्न-पुरुष-विषयत्वाद्,

अन्यतरस्य प्रशस्यतरत्व-बुभुत्सया प्रश्नोऽनुपपन्नः।।

**समाधानम्**

सत्यमेव त्वदभिप्रायेण प्रश्नो नोपपद्यते। प्रष्टुः स्वाभिप्रायेण पुनः प्रश्नो युज्यत एवेति वदामः।।

**आक्षेपः**

कथम्?

**समाधानम्**

**द्ध**पूर्वोदाहृतैर्वचनैर्भगवता कर्म-संन्यासस्य कर्त्तव्यतया विवक्षितत्वात् प्राधान्यम्। अन्तरेण च कर्त्तारं तस्य कर्त्तव्यत्वासम्भवात्। अनात्मविदपि कर्त्ता पक्षे प्रा''ोऽनूद्यते एव। न पुनः आत्मवित्कर्त्तृकत्वमेव संन्यासस्य विवक्षितम्**द्ध** इत्येवं मन्वानस्यार्जुनस्य कर्मानुष्ठान-कर्म-संन्यासयोरविद्वत्पुरुष-कर्त्तृकत्वमप्यस्तीति पूर्वोक्तेन प्रकारेण तयोः परस्पर-विरोधाद् अन्यतरस्य कर्त्तव्यत्वे प्रा''ै प्रशस्यतरं च कर्त्तव्यं, नेतरदिति प्रशस्यतर-विविदिषया प्रश्नो नानुपपन्नः। प्रतिवचन-वाक्यार्थ-निरूपणेनापि प्रष्टुरभिप्राय एवमेवेति गम्यते।।

**आक्षेपः**

कथम् ?

**समाधानम्**

"संन्यास-कर्मयोगौ निःश्रेयस-करौ। तयोस्तु कर्म-योगो विशिष्यते" (गी ५.२) इति प्रति-वचनम्।

एतन्निरूप्यं - किमनेन अत्मवित्कर्तृकयोः संन्यास-कर्मयोगयोः निःश्रेयस-करत्वं प्रयोजनमुक्त्वा तयोरेव कुतश्चिद् विशेषात् कर्म-संन्यासात् कर्म-योगस्य विशिष्टत्वमुच्यते, आहोस्विदनात्मवित्कर्तृकयोः संन्यास-कर्म-योगयोः तदुभयमुच्यते इति।।

**आक्षेपः**

किञ्चातः यदि आत्मवित्कर्तृकयोः संन्यास-कर्म-योगयोर्निःश्रेयस-करत्वं तयोस्तु कर्म-संन्यासात् कर्मयोगस्य विशिष्टत्वमुच्यते यदि वा अनात्मवित्कर्तृकयोः संन्यास-कर्म-योगयोः तदुभयमुच्यते

इति ?

**समाधानम्**

अत्रोच्यते - आत्मवित्कर्तृकयोः संन्यास-कर्मयोगयोरसम्भवात् तयोर्निःश्रेयस-करत्व-वचनं तदीयाच्च कर्म-संन्यासात् कर्म-योगस्य विशिष्टत्वाभिधानमित्येतदुभयम् अनुपपन्नम्। यद्यनात्मविदः कर्म-संन्यासः तत्प्रतिकूलश्च कर्मानुष्ठान-लक्षणः कर्म-योगः सम्भवेतां तदा तयोर्निःश्रेयस-करत्वोक्तिः कर्म-योगस्य च कर्म-संन्यासाद् विशिष्टत्वाभिधानमित्येतदुभयमुपपद्यते [१] । आत्मविदस्तु संन्यास-कर्मयोगयोरसम्भवात् तयोर्निःश्रेयस-करत्वाभिधानं कर्म-संन्यासाच्च कर्म-योगो विशिष्यते इति चानुपपन्नम्।।

[1] उपपद्येत इति वा।

**प्रश्नः**

अत्राह - किमात्मविदः संन्यास-कर्मयोगयोरुभयोरप्यसम्भवः आहोस्विद् अन्यतरस्यासम्भवः? यदा च अन्यतरस्यासम्भवः तदा किं कर्म-संन्यासस्य उत कर्म-योगस्य इति? असम्भवे कारणं च वक्तव्यमिति।।

**उत्तरम्**

अत्रोच्यते - आत्म-विदो निवृत्त-मिथ्या-ज्ञानत्वाद् विपर्यय-ज्ञान-मूलस्य कर्म-योगस्यासम्भवः स्यात्। जन्मादि-सर्व-विक्रिया-रहितत्वेन निष्क्रियमात्मानम् आत्मत्वेन यो वेत्ति तस्यात्मविदः सम्यग्दर्शनेनापास्त-मिथ्या-ज्ञानस्य निष्क्रियात्म-स्वरूपावस्थान-लक्षणं सर्व-कर्म-संन्यासमुक्त्वा तद्विपरीतस्य मिथ्या-ज्ञान-मूल-कर्तृत्वाभिमान-पुरःसरस्य सक्रियात्म-स्वरूपावस्थान-रूपस्य

कर्म-योगस्येह शास्त्रे तत्र तत्रात्मस्वरूप-निरूपण-प्रदेशेषु सम्यग्ज्ञान-मिथ्या-ज्ञान-तत्कार्यविरोधादभावः प्रतिपाद्यते यस्मात् तस्माद् आत्म-विदो निवृत्त-मिथ्या-ज्ञानस्य विपर्यय-ज्ञान-मूलः कर्म-योगो न सम्भवतीति युक्तम् उक्तं स्यात्।।

**प्रश्नः**

केषु केषु पुनरात्म-स्वरूप-निरूपण-प्रदेशेष्वात्मविदः कर्माभावः प्रतिपाद्यते? इति।

**उत्तरम्**

अत्रोच्यते - "अविनाशि तु तद्विद्धि" (गी २.१७) इति प्रकृत्य "य एनं वेत्ति हन्तारम्" (गी २.१९) "वेदाविनाशिनं नित्यम्" (गी २.२१) इत्यादौ तत्र तत्रात्मविदः कर्माभाव उच्यते।।

**आक्षेपः**

ननु च कर्मयोगोऽप्यात्म-स्वरूप-निरूपण-प्रदेशेषु तत्र तत्र प्रतिपाद्यत एव। तद्यथा - "तस्माद्

युध्यस्व भारत" (गी २.१८), "स्वधर्ममपि चावेक्ष्य" (गी २.३१), "कर्मण्येवाधिकारस्ते" (गी २.४७) इत्यादौ। अतश्च कथमात्मविदः कर्म-योगस्य असम्भवः स्यादिति।।

**समाधानम्**

अत्रोच्यते -

१) सम्यग्ज्ञान-मिथ्या-ज्ञान-तत्कार्य-विरोधात्, २) "ज्ञान-योगेन साङ्ख्यानाम्" (गी ३.३) इत्यनेन साङ्ख्यानामात्म-तत्त्व-विदाम् अनात्मवित्कर्तृक-कर्म-योग-निष्ठातो निष्क्रियात्म-स्वरूपावस्थान-लक्षणायाः ज्ञान-योग-निष्ठायाः पृथक्करणात्, ३) कृत-कृत्यत्वेनात्म-विदः प्रयोजनान्तराभावात्, ४) "तस्य कार्यं न विद्यते" (गी ३.१७) इति कर्त्तव्यान्तराभाव-वचनाच्च, ५) "न

कर्मणामनारम्भात्" (गी ३.४), "संन्यासस्तु महाबाहो दुःखमा"ुमयोगतः" (गी ५.६), इत्यादिना चात्म-ज्ञानाङ्गत्वेन कर्म-योगस्य विधानात्, ६) "योगारूढस्य तस्यैव शमः कारणमुच्यते" (गी ६.३) इत्यनेन चोत्पन्न-सम्यग्दर्शनस्य कर्मयोगाभाव-वचनात्, ७) "शारीरं केवलं कर्म कुर्वन् नाप्नोति किल्बिषम्" (गी ४.२१) इति च शरीर-स्थिति-कारणातिरिक्तस्य कर्मणो निवारणात्, ८) "नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्" (गी ५.८) इत्यनेन च शरीर-स्थिति-मात्र-प्रयुक्तेष्वपि दर्शन-श्रवणादि-कर्मसु आत्म-याथात्म्य-विदः "करोमि" इति प्रत्ययस्य समाहित-चेतस्तया सदाऽकर्त्तव्यत्वोपदेशात्, आत्म-तत्त्व-विदः सम्यग्दर्शन-विरुद्धो

मिथ्या-ज्ञान-हेतुकः कर्म-योगः स्वप्नेऽपि न सम्भावयितुं शक्यते यस्मात्, तस्माद् अनात्मवित्कर्त्तृकयोरेव संन्यास-कर्म-योगयोः निःश्रेयस-करत्व-वचनं, तदीयाच्च कर्म-संन्यासात् पूर्वोक्तात्मवित्कर्त्तृक-सर्व-कर्म-संन्यास-विलक्षणात् सत्येव कर्त्तृत्व-विज्ञाने कर्मैकदेश-विषयाद्[2] यम-नियमादि-सहितत्वेन च दुरनुष्ठेयत्वात् सुकरत्वेन च कर्म-योगस्य विशिष्टत्वाभिधानमित्येवं प्रति-वचन-वाक्यार्थ-निरूपणेनापि पूर्वोक्तः प्रष्टुरभिप्रायो निश्चीयते इति स्थितम्।।

"ज्यायसी चेत् कर्मणस्ते" (गी ३.१) इत्यत्र ज्ञान-कर्मणोः सहासम्भवे "यच्छ्रेय एतयोस्तन्मे ब्रूहि" (गी ५.१) इत्येवं पृष्टोऽर्जुनेन भगवान् "साङ्ख्यानां संन्यासिनां ज्ञानयोगेन निष्ठा पुनः

[2] अज्ञो हि यज्ञयागादिकं कर्मैकदेशमेव संन्यस्तवान् न तु सर्वं कर्म, तस्य दण्ड-तर्पण-स्नान-भिक्षाटनादि-सत्त्वात्। तेषु कर्त्तृत्वाभिमानसत्त्वात्।

कर्मयोगेन योगिनां निष्ठा प्रोक्ता" इति निर्णयं चकार।

"न च संन्यसनादेव केवलात् सिद्धिं समधिगच्छति" (गी ३.४) इति वचनाद् ज्ञान-सहितस्य

सिद्धि-साधनत्वम् इष्टम्[3], कर्मयोगस्य च[4], विधानात्[5]।

ज्ञानरहितः संन्यासः श्रेयान् किं वा कर्मयोगः श्रेयान् इत्येतयोः विशेषबुभुत्सया -

**अर्जुन उवाच।**

**संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि।**

**यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्।। ५.१ ।।**

---

[3] भगवतः इति शेषः।

[4] कर्मयोगस्य च सिद्धि-साधनत्वम् इष्टम् इत्यन्वयः।

[5] छित्त्वैनं संशयं योगम्.... इति भगवता विहितत्वात्। तस्मात् साङ्ख्ययोगयोः विशेषबुभुत्सया पुनः न प्रश्नवकाशः। तर्हि केनाभिप्रायेण प्रश्नोत्पत्तिरत आह - ज्ञानेति।

कृष्ण कर्मणां संन्यासं पुनर्योगं च शंससि। एतयोः यत् एकं सुनिश्चितम् श्रेयः तद् मे ब्रूहि ।। १

*Arjuna* said:
O *Kṛṣṇa*, you praise renunciation of actions and also *karma-yoga*. Tell me definitely which one of these two is better.

संन्यासमिति। संन्यासं परित्यागं कर्मणां शास्त्रीयाणाम् अनुष्ठान-विशेषाणां शंससि कथयसीत्येतत्। पुनर्योगं च तेषामेवानुष्ठानम् अवश्य-कर्त्तव्यत्वं शंससि। अतो मे कतरच्छ्रेय इति संशयः। किं कर्मानुष्ठानं श्रेयः किं वा तद्धानमिति। प्रशस्यतरं च अनुष्ठेयम्। अतश्च यच्छ्रेयः प्रशस्यतरम् एतयोः कर्म-संन्यास-कर्मानुष्ठानयोः, यदनुष्ठानात् श्रेयोऽवाप्तिर्मम स्यादिति मन्यसे तद् एकम् अन्यतरत् सहैक-पुरुषानुष्ठेयत्वासम्भवाद् ब्रूहि मे सुनिश्चितम् अभिप्रेतं तवेति।। १ ।।

स्वाभिप्रायमाचक्षाणः निर्णयाय -

**श्रीभगवानुवाच।**

**संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।**

**तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते।। ५.२ ।।**

उभौ संन्यासः कर्मयोगश्च निःश्रेयसकरौ । तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते। २

*Śrī Bhagavān* said:
Both renunciation (of action) and performance of action as *yoga* lead to liberation. But, of these two, the performance of action as *yoga* is better than renunciation of action.

संन्यास इति। संन्यासः कर्मणां परित्यागः कर्मयोगश्च तेषामनुष्ठानं तौ उभौ अपि निःश्रेयसकरौ

निःश्रेयसं मोक्षं कुर्वाते ज्ञानोत्पत्ति-हेतुत्वेन। उभौ यद्यपि निःश्रेयस-करौ तथापि तयोस्तु निःश्रेयस-

हेत्वोः कर्मसंन्यासात् केवलात् कर्मयोगो विशिष्यते इति कर्म-योगं स्तौति।। २ ।।

कस्मात्। इत्याह - ज्ञेय इति।

**ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।**

**निर्द्वन्द्वो हि महाबाहो सुखं बन्धात् प्रमुच्यते।। ५.३ ।।**

यः न द्वेष्टि न काङ्क्षति स नित्यसंन्यासी ज्ञेयः । महाबाहो निर्द्वन्द्वो हि सुखं बन्धात् प्रमुच्यते।। ३

The person who neither hates nor longs (for anything) should be known as always a renunciate O *Arjuna*, because one who is free from the opposites (likes and dislikes) is effortlessly released from bondage.

ज्ञेय इति। ज्ञेयः ज्ञातव्यः सः कर्मयोगी नित्यसंन्यासी इति यो न द्वेष्टि किञ्चिद् न काङ्क्षति दुःख-

सुखे तत्साधने च। एवं-विधो यः कर्मणि वर्त्तमानोऽपि स नित्य-संन्यासी इति ज्ञातव्य इत्यर्थः।

निर्द्वन्द्वो द्वन्द्व-वर्जितः हि यस्माद् महाबाहो सुखं बन्धाद् अनायासेन प्रमुच्यते।। ३ ।।

संन्यासकर्मयोगयोः भिन्नपुरुषानुष्ठेययोः विरुद्धयोः फले अपि विरोधः युक्तः न तु उभयोः

निःश्रेयसकरत्वमेव इति प्रा’ेे इदमुच्यते -

**साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।**

**एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्।। ५.४ ।।**

बालाः सांख्ययोगौ पृथग् प्रवदन्ति। न पण्डिताः। एकमपि सम्यग् आस्थितः उभयोः फलम् विन्दते ।। ४

Children (those who do not know), (but) not the wise, argue that knowledge and *karma-yoga* are different. The person who follows even one (of the two) properly, gains the result of both.

Sankhya and yoga are distinct. Meaning having different results. Thus childish people say.

साङ्ख्ययोगाविति। साङ्ख्ययोगौ पृथग् विरुद्ध-भिन्न-फलौ बालाः प्रवदन्ति, न पण्डिताः।

पण्डितास्तु ज्ञानिन एकं फलमविरुद्धमिच्छन्ति। कथम्? एकमपि सांख्य-योगयोः सम्यग् आस्थितः

सम्यगनुष्ठितवान् इत्यर्थः। उभयोः विन्दते फलम्। उभयोः तदेव हि निःश्रेयसं फलम्। अतः न फले विरोधोऽस्ति।।

**आक्षेपः**

ननु संन्यास-कर्म-योग-शब्देन प्रस्तुत्य सांख्य-योगयोः फलैकत्वं कथमिह अप्रकृतं ब्रवीति।

**समाधानम्**

नैष दोषः। यद्यप्यर्जुनेन संन्यासं कर्म-योगं च केवलमभिप्रेत्य प्रश्नः कृतः, भगवान् तु तदपरित्यागेनैव स्वाभिप्रेतं च विशेषं संयोज्य शब्दान्तर-वाच्यतया प्रति-वचनं ददौ सांख्ययोगाविति। तावेव संन्यास-कर्म-योगौ ज्ञान-तदुपाय-सम-बुद्धित्वादि-संयुक्तौ सांख्य-योग-शब्द-वाच्याविति भगवतो मतम्। अतो नाप्रकृत-प्रक्रियेति।। ४ ।।

एकस्यापि सम्यगनुष्ठानात् कथम् उभयोः फलं विन्दते इत्युच्यते -

**यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।**

**एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति।। ५.५ ।।**

यत् स्थानं सांख्यैः प्राप्यते तद्योगैरपि गम्यते। यः सांख्यं च योगं च एकं पश्यति सः पश्यति।। ५

The end (*mokṣa*) that is gained by the *sannyāsīs* is also reached by the *karma-yogīs*. The one who sees knowledge and *karma-yoga* as one, that person (alone) sees (the truth).

यदिति। यत्सांख्यैः ज्ञाननिष्ठैः संन्यासिभिः प्राप्यते स्थानं मोक्षाख्यं तद् योगैरपि ज्ञान-प्रा''युपायत्वेनेश्वरे समर्प्य कर्माणि, आत्मनः फलमनभिसन्धायानुतिष्ठन्ति ये ते योगाः योगिनः तैरपि परमार्थ-ज्ञान-संन्यास-प्रा''ि-द्वारेण गम्यते इत्यभिप्रायः। अत एकं साङ्ख्यं च योगं च यः पश्यति फलैकत्वात् स पश्यति सम्यक् पश्यतीत्यर्थः।

**प्रश्नः**

एवं तर्हि योगात् संन्यास एव विशिष्यते। कथं तर्हीदमुक्तं "तयोस्तु कर्म-संन्यासात् कर्म-योगो विशिष्यते" (गी ५.२) इति।

**उत्तरम्**

शृणु तत्र कारणम्। त्वया पृष्टं केवलं कर्म-संन्यासं कर्मयोगं चाभिप्रेत्य तयोरन्यतरः कः श्रेयानिति। तदनुरूपं प्रति-वचनं मयोक्तं कर्म-संन्यासात् कर्मयोगो विशिष्यते इति ज्ञानमनपेक्ष्य। ज्ञानापेक्षस्तु संन्यासः सांख्यमिति मयाभिप्रेतः। परमार्थ-योगश्च स एव। यस्तु कर्म-योगो वैदिकः स तादर्थ्याद् योगः संन्यास इति चोपचर्यते।। ५ ।।

कथं तादर्थ्यमिति। उच्यते -

**संन्यासस्तु महाबाहो दुःखमा''ुमयोगतः।**

**योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति।। ५.६ ।।**

महाबाहो संन्यासस्तु अयोगतः आ''ु दुःखम्। योगयुक्तो मुनिः नचिरेण ब्रह्म अधिगच्छति।। ६

Renunciation of action, O *Arjuna*, is difficult to accomplish without *karma-yoga*. Whereas, one who is capable of reasoning, who is committed to a life of *karma-yoga*, gains *Brahman* quickly.

संन्यासस्तु पारमार्थिको हे महाबाहो दुःखम् आ''ु प्रा''ुम् अयोगतः योगेन विना। योगयुक्तो वैदिकेन कर्मयोगेनेश्वर-समर्पित-रूपेण फल-निरपेक्षेण युक्तः मुनिः मननाद् ईश्वर-स्वरूपस्य मुनिः ब्रह्म परमात्म-ज्ञान-लक्षणत्वात् प्रकृतः संन्यासो ब्रह्म उच्यते। "न्यास इति ब्रह्म ब्रह्मा हि परः" (म.ना. ४.७८) इति श्रुतेः। ब्रह्म परमार्थ-संन्यासं परमात्म-ज्ञान-निष्ठा-लक्षणं नचिरेण क्षिप्रमेव अधिगच्छति प्राप्नोति। अतो मयोक्तं "कर्म-योगो विशिष्यते" (गी ५.२) इति।। ६ ।।

यदा पुनः अयं सम्यग्दर्शनप्रा’’युपायत्वेन -

**योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।**

**सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते।। ५.७ ।।**

योगयुक्तो (पुरुषः) विशुद्धात्मा विजितात्मा जितेन्द्रियः (भूत्वा) सर्वभूतात्मभूतात्मा (च भूत्वा) कुर्वन्नपि न लिप्यते।। ७

One whose mind is purified by being committed to a life of *karma-yoga*, who has mastered the body and has the sense organs under control, and who knows oneself to be the self in all beings, (such a person) is not affected even while doing (actions).

योगयुक्त इति। योगेन युक्तः योगयुक्तः विशुद्धात्मा विशुद्ध-सत्त्वो विजितात्मा विजित-देहः

जितेन्द्रियः च। सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादीनां स्तम्ब-पर्यन्तानां भूतानामात्म-भूतः, आत्मा

प्रत्यक्चेतनो यस्य स सर्व-भूतात्म-भूतात्मा, सम्यग्दर्शीत्यर्थः।

स तत्रैवं वर्त्तमानो लोक-संग्रहाय कर्म कुर्वन्नपि न लिप्यते न कर्मभिर्बध्यत इत्यर्थः।। ७ ।।

न चासौ परमार्थतः करोतीत्यतः -

**नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्।**

**पश्यन् श्रृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन्श्वसन्।। ५.८**

**।।**

**प्रलपन् विसृजन् गृह्णन् उन्मिषन्निमिषन्नपि।**

**इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्।। ५.९ ।।**

तत्ववित् युक्तः (सन्) पश्यन् श्रृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन्निमिषन्नपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्त इति धारयन् (सन्) (अहम्) किञ्चित् नैव करोमीति मन्येत ।। ९

The one who is together, who knows the truth, thinks, 'I do not do anything at all,' even while seeing, hearing, touching, smelling, eating, walking, sleeping, breathing, talking, releasing, grasping, opening and closing the eyes, (the person) knowing (full well that) the organs are engaged in their objects.

नैवेति। नैव किञ्चित् करोमीति युक्तः समाहितः सन् मन्येत चिन्तयेत् तत्त्वविद् आत्मनो याथात्म्यं तत्त्वं वेत्तीति तत्त्ववित् परमार्थ-दर्शीत्यर्थः। कदा कथं वा तत्त्वमवधारयन् मन्येतेत्युच्यते - पश्यन्निति। मन्येतेति पूर्वेण सम्बन्धः। यस्यैवं तत्त्व-विदः सर्वकार्य-करण-चेष्टासु कर्मसु अकर्मैव पश्यतः सम्यग्दर्शिनः तस्य सर्व-कर्म-संन्यास एवाधिकारः कर्मणोऽभाव-दर्शनात्।

न हि मृग-तृष्णिकायामुदक-बुद्ध्या पानाय प्रवृत्त उदकाभाव-ज्ञानेऽपि तत्रेव पान-प्रयोजनाय प्रवर्त्तते।। ८ ।। ।। ९ ।।

यस्तु पुनः अतत्ववित् प्रवृत्तश्च कर्मयोगे -

**ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।**

**लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।। ५.१० ।।**

यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति स: अम्भसा पद्मपत्रम् (न लिप्यते) इव पापेन न लिप्यते ।। १०

The one who performs actions, giving up attachment, offering (one's actions) unto *Brahman*, is not affected by sin, just as the leaf of a lotus (is not wetted) by water.

ब्रह्मणीति। ब्रह्मणि ईश्वरे आधाय निक्षिप्य तदर्थं करोमीति भृत्य इव स्वाम्यर्थं सर्वाणि कर्माणि, मोक्षेऽपि फले सङ्गं त्यक्त्वा, करोति यः सर्व-कर्माणि, लिप्यते न स पापेन न सम्बध्यते पद्मपत्रमिव अम्भसा उदकेन। केवलं सत्त्व-शुद्धि-मात्र-फलमेव तस्य कर्मणः स्यात्।। १० ।।

यस्मात् -

**कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।**

**योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये।। ५.११ ।।**

योगिनः सङ्गं त्यक्त्वा आत्मशुद्धये कायेन मनसा बुद्ध्या केवलैः इन्द्रियैः अपि कर्म कुर्वन्ति ।। ११

Giving up attachment, *karma-yogīs* perform action purely (without attachment) with the body, mind, intellect, and also by the senses, for the purification of the mind.

कायेनेति। कायेन देहेन मनसा बुद्ध्या च केवलैः ममत्व-वर्जितैः "ईश्वरायैव कर्म करोमि न मम फलाय" इति ममत्व-बुद्धि-शून्यैः इन्द्रियैरपि। केवल-शब्दः कायादिभिरपि प्रत्येकं सम्बध्यते। सर्व-व्यापारेषु ममता-वर्जनाय। योगिनः कर्मिणः कर्म कुर्वन्ति सङ्गं त्यक्त्वा फल-विषयम् आत्मशुद्धये सत्त्व-शुद्धय इत्यर्थः। तस्मात् तत्रैव तवाधिकार इति "कुरु कर्मैव"।। ११ ।।

यस्माच्च -

**युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।**

**अयुक्तः कामकारेण फले सक्तो निबध्यते।। ५.१२ ।।**

युक्तः कर्मफलं त्यक्त्वा नैष्ठिकीं शान्तिम् आप्नोति । अयुक्तः कामकारेण फले सक्तो निबध्यते।। १२

The one who is endowed with (*karma-yoga*), giving up the result of action, gains a composure born of a commitment to a life of *karma-yoga*. (Whereas) one who is not committed to a life of *karma-yoga*, led by desire, is bound, (being) attached to the result (of action).

युक्त इति। युक्तः "ईश्वराय कर्माणि न मम फलाय" इत्येवं समाहितः सन् कर्मफलं त्यक्त्वा परित्यज्य शान्तिं मोक्षाख्याम् आप्नोति नैष्ठिकीम् निष्ठायां भवाम्। सत्त्वशुद्धि-ज्ञानप्रा‍ि-सर्वकर्मसंन्यास-ज्ञाननिष्ठा-क्रमेणेति वाक्यशेषः। यस्तु पुनः अयुक्तः असमाहितः कामकारेण करणं कारः कामस्य कारः काम-कारः तेन काम-कारेण, काम-प्रेरिततयेत्यर्थः। "मम फलायेदं करोमि कर्म" इत्येवं फले सक्तो निबध्यते। अतः "त्वं युक्तो भव" इत्यर्थः।। १२ ।।

यस्तु परमार्थ-दर्शी सः -

**सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।**

**नवद्वारे पुरे देही नैव कुर्वन्न कारयन्।। ५.१३ ।।**

सर्वकर्माणि मनसा संन्यस्य वशी सन् नैव कुर्वन्न कारयन् सन् नवद्वारे पुरे देही सुखं आस्ते ।। १३
वशी देहिपदस्य विशेषणम्।

The indweller of the physical body, the one who is self-controlled, having renounced all actions mentally (by knowledge), remains happily in the nine-gated city (the body) neither performing action, nor causing (others) to act.

सर्वकर्माणीति। सर्वाणि कर्माणि सर्वकर्माणि संन्यस्य परित्यज्य। नित्यं, नैमित्तिकं, काम्यं, प्रतिषिद्धं च तानि सर्व-कर्माणि मनसा विवेक-बुद्ध्या कर्मादावकर्म-संदर्शनेन संत्यज्येत्यर्थः। आस्ते तिष्ठति सुखम्। त्यक्त-वाङ्-मनः-काय-चेष्टो यतिर्निरायासः प्रसन्नचित्त आत्मनोऽन्यत्र निवृत्त-सर्व-बाह्य-प्रयोजनः इति सुखमास्त इत्युच्यते। वशी जितेन्द्रिय इत्यर्थः।

क कथमास्त इत्याह - नवद्वारे पुरे स’’ा-शीर्षण्यान्यात्मन उपलब्धि-द्वाराणि अर्वाग् द्वे मूत्र-पुरीष-विसर्गार्थे तैर्द्वारैर्नवद्वारं पुरमुच्यते शरीरम्। पुरमिव पुरम् आत्मैकस्वामिकम्। तदर्थ-प्रयोजनैश्च, इन्द्रिय-मनो-बुद्धि-विषयैः, अनेक-फल-विज्ञानस्य उत्पादकैः, पौरैः इव अधिष्ठितम्। तस्मिन् नवद्वारे पुरे देही सर्वं कर्म संन्यस्य आस्ते।।

**आक्षेपः**

किं विशेषणेन। सर्वो हि देही संन्यास्यसंन्यासी वा देहे एवास्ते। तत्रानर्थकं विशेषणमिति।

**समाधानम्**

उच्यते। यस्त्वज्ञो देही देहेन्द्रिय-संघात-मात्रात्म-दर्शी सः सर्वोऽपि **द्व**गेहे, भूमौ, आसने वा आसे**द्य** इति मन्यते। न हि देह-मात्रात्म-दर्शिनो **द्व**गेह इव देहे आसे**द्य** इति प्रत्ययः सम्भवति।

देहादि-संघात-व्यतिरिक्तात्म-दर्शिनस्तु **द्ध**देहे आसे**द्य** इति प्रत्ययः उपपद्यते।

पर-कर्मणां च परस्मिन्नात्मन्यविद्ययाऽध्यारोपितानां विद्यया विवेक-विज्ञानेन मनसा संन्यास उपपद्यते[६]।

उत्पन्न-विवेक-विज्ञानस्य[७] सर्व-कर्म-संन्यासिनोऽपि गेह इव देह एव नवद्वारे पुर आसनं प्रारब्ध-फल-कर्म-संस्कार-शेषानुवृत्त्या, देह एव विशेष-विज्ञानोत्पत्तेः[८] देह एवास्ते इत्यस्त्येव विशेषण-फलं विद्वदविद्वत्प्रत्यय-भेदापेक्षत्वात्।।

---

[6] देहेन्द्रियकर्माणि परकर्माणि। तामि अविद्यया आत्मनि अध्यारोपितानि इत्यतः अज्ञानादात्मनि कर्मप्रसङ्गः। अतो मनसा विद्यया तत्संन्यासोपपत्तिः।

[7] अनुत्पन्नविवेकविज्ञानस्य इव।

[8] सूक्ष्मदेहे मनसि आत्मानमनुसन्धत्ते इति हेतोः देहे एवास्ते इत्युक्तम्।

यद्यपि कार्य-करण-कर्माण्यविद्ययात्मन्यध्यारोपितानि द्धसंन्यस्यास्तेद्ध इत्युक्तं तथाप्यात्म-समवायि च कर्त्तृत्वं कारयितृत्वं च स्याद् इत्याशङ्क्याह - नैव कुर्वन् स्वयं, न च कार्य-करणानि कारयन् क्रियासु प्रवर्त्तयन्। किं यत्तत्कर्त्तृत्वं कारयितृत्वं च देहिनः स्वात्मसमवायि सत् संन्यासान्न सम्भवति यथा गच्छतो गतिर्गमन-व्यापार-परित्यागे न स्यात् तद्वत्, किंवा स्वतः एवात्मनो नास्तीति। अत्रोच्यते - नास्त्यात्मनः स्वतः कर्त्तृत्वं कारयितृत्वं च।

उक्तं हि "अविकार्योऽयमुच्यते" (गी २.२५) "शरीरस्थोऽपि कौन्तय न करोति न लिप्यते" (गी १३.३१) इति। "ध्यायतीव लेलायतीव" (बृ ४.३.७) इति श्रुतेः।। १३ ।।

किञ्च -

**न कर्त्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।**

**न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते।। ५.१४ ।।**

प्रभुः लोकस्य कर्तृत्वं न सृजति कर्माणि न (सृजति)। (कर्त्रा सह) कर्मफलसंयोगं न (सृजति)। स्वभावस्तु प्रवर्त्तते (कुर्वन् कारयंश्च सन्)।। १४

*Ātmā* creates neither doership nor action for any person nor the connection with the results of action. But one's own nature leads to action.

न कर्त्तृत्वमिति। न कर्त्तृत्वं स्वतः कुरु इति। न अपि कर्माणि रथ-घट-प्रासादादीनीप्सिततमानि लोकस्य सृजति उत्पादयति प्रभुः आत्मा। न अपि रथादि-कृतवतः तत्फलेन संयोगं न कर्मफलसंयोगम्। यदि किञ्चिदपि स्वतो न करोति, न कारयति च देही, कस्तर्हि कुर्वन् कारयंश्च प्रवर्त्तत इत्युच्यते। स्वभावस्तु स्वो भावः स्वभावोऽविद्या-लक्षणा प्रकृतिर्माया प्रवर्त्तते “दैवी हि” (गी ७.१४) इत्यादिना वक्ष्यमाणा।। १४ ।।

परमार्थतस्तु -

**नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः।**

**अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।। ५.१५ ।।**

विभुः कस्यचित् पापं न आदत्ते। (कस्यचित्) सुकृतं च नैव (आदत्ते) । अज्ञानेन ज्ञानम् आवृतम्। तेन जन्तवः मुह्यन्ति ।। १५

The *ātmā* accepts neither the *pāpa* nor the *puṇya* of anyone. Knowledge is covered by ignorance and because of that (ignorance) people are deluded.

नादत्ते इति। नादत्ते न च गृह्णाति भक्तस्यापि कस्यचित् पापं, न चैव आदत्ते सुकृतं भक्तैः प्रयुक्तं विभुः[९]। किमर्थं तर्हि भक्तैः पूजादि-लक्षणं याग-दान-होमादिकं च सुकृतं प्रयुज्यत इत्याह - अज्ञानेनावृतं ज्ञानं विवेक-विज्ञानं तेन मुह्यन्ति द्धकरोमि, कारयामि, भोक्ष्ये, भोजयामिद्ध इत्येवं मोहं गन्छन्त्यविवेकिनः संसारिणो जन्तवः।। १५ ।।

---

9 स्वरूपदृष्ट्या इदमुच्यते। अन्यथा पत्रं पुष्पं..अश्नामि इत्युक्तम्।

**ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।**

**तेषामादित्यवद् ज्ञानं प्रकाशयति तत्परम्।। ५.१६ ।।**

येषां तद् अज्ञानं ज्ञानेन तु नाशितमात्मनः। तेषामादित्यवत् ज्ञानं तत्परम् प्रकाशयति ।। १६

Whereas for those whose ignorance of the self is destroyed by knowledge, the knowledge reveals (the self as) that *Brahman*, like the sun (reveals objects previously covered in darkness).

ज्ञानेनेति। ज्ञानेन तु, येनाज्ञानेनावृता मुह्यन्ति जन्तवः तद् अज्ञानं येषां जन्तूनां विवेक-ज्ञानेनात्म-

विषयेण नाशितमात्मनः[१०] भवति तेषाम् आदित्यवत् यथा आदित्यः समस्तं रूप-जातमवभासयति

तद्वद् ज्ञानं ज्ञेयं वस्तु सर्वं प्रकाशयति तत् परं परमार्थ-तत्त्वम्।। १६ ।।

10 आत्मनः अज्ञानमिति अन्वयः। ज्ञानं तत्परं साकल्येन प्रकाशयति। ज्ञेयस्यैव वस्तुनः तत्परमिति विशेषणम्।

यत्परं ज्ञानं प्रकाशितम् -

**तद्बुद्धयस्तदात्मानः तन्निष्ठास्तत्परायणाः।**

**गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः।। ५.१७ ।।**

तद्बुद्धयः तदात्मानः तन्निष्ठाः तत्परायणाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ।। १७

Those whose intellect is awake to that (*Brahman*), for whom the self is that (*Brahman*), who are committed only to that (*Brahman*), for whom the ultimate end is that (*Brahman*) which they have already accomplished), whose impurities have been destroyed by knowledge — they attain a state from which there is no return.

तद्बुद्धय इति। तस्मिन् ब्रह्मणि गता बुद्धिर्येषां ते तद्बुद्धयः।

तदात्मानः तदेव परं ब्रह्मात्मा येषां ते तदात्मानः।

तन्निष्ठाः निष्ठाभिनिवेशः तात्पर्यं, सर्वाणि कर्माणि संन्यस्य ब्रह्मण्येवावस्थानं येषां ते तन्निष्ठाः।

तत्परायणाः च तदेव परमयनं परा गतिर्येषां भवति ते तत्परायाणाः।

केवलात्म-रतय इत्यर्थः। येषां ज्ञानेन नाशितमात्मनोऽज्ञानं ते गच्छन्ति एवं-विधाः अपुनरावृत्तिं

अपुनर्देह-सम्बन्धं ज्ञाननिर्धूतकल्मषाः यथोक्तेन ज्ञानेन निर्धूतो निहतो नाशितः कल्मषः पापादि-

संसार-कारण-दोषो येषां ते ज्ञान-निर्धूत-कल्मषा यतय इत्यर्थः।। १७ ।।

येषां ज्ञानेन नाशितमात्मनः अज्ञानं ते पण्डिताः कथं तत्वं पश्यन्ति इत्युच्यते -

**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**

**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।। ५.१८ ।।**

पण्डिताः विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि श्वपाके च समदर्शिनः एव (भवन्ति)।। १८

Wise people are indeed those who see the same (*Brahman*) in a *brāhmaṇa* who is endowed with knowledge and humility, in a cow, in an elephant, in a dog, and (even) in a dog-eater.

विद्येति। विद्याविनयसम्पन्ने विद्या च विनयश्च विद्या-विनयौ, विनयमुपशमः ताभ्यां विद्या-विनयाभ्यां सम्पन्नो विद्या-विनय-सम्पन्नः।

विद्वान् विनीतश्च यो ब्राह्मणः तस्मिन् ब्राह्मणे, गवि, हस्तिनि, शुनि चैव, श्वपाके च, पण्डिताः समदर्शिनः।

विद्या-विनय-संपन्ने उत्तम-संस्कारवति ब्राह्मणे सात्त्विके, मध्यमायां च राजस्यां गवि संस्कारहीनायाम्, अत्यन्तमेव केवल-तामसे हस्त्यादौ च, सत्त्वादि-गुणैः तज्जैश्च संस्कारैः तथा राजसैः तथा तामसैश्च संस्कारैरत्यन्तमेवासंस्पृष्टं सममेकमविक्रियं ब्रह्म द्रष्टुं शीलं येषां ते पण्डिताः सम-दर्शिनः।। १८ ।।

ननु अभोज्यान्नाः ते दोषवन्तः "समासमाभ्यां विषम-समे पूजातः" (गौ.ध.सूत्र १७.२०)

इति स्मृतेः[११]। न ते दोषवन्तः। कथम्?

**इहैव तैर्जितः सर्गः येषां साम्ये स्थितं मनः।**

**निर्दोषं हि समं ब्रह्म तस्मात् ब्रह्मणि ते स्थिताः।। ५.१९ ।।**

येषां मनः साम्ये स्थितं तैः इहैव सर्गः जितः। हि ब्रह्म निर्दोषं समं च। (यस्मात् निर्दोषं समं ब्रह्म) तस्मात् ब्रह्मणि (एव) ते स्थिताः (न तु दोषवत् पिण्डे)। तस्मत् त न दोषवन्तः)। १९

The cycle of birth and death (*saṃsāra*) is won over by those whose mind is rooted in the same (that is *Brahman*) here itself (in this life). Since *Brahman*, that is free from any defect, is (always) the same, they (the wise people) abide in *Brahman*.

इहैवेति। इहैव जीवद्भिरेव तैः सम-दर्शिभिः पण्डितैः जितः वशीकृतः सर्गः जन्म येषां साम्ये सर्व-

भूतेषु ब्रह्मणि सम-भावे स्थितं निश्चली भूतं मनः अन्तःकरणं निर्दोषम्।

[11] कुलशीलविद्यादिभिस्तुल्यः समः, तद्विपरीतोऽसमः, विषमसमशब्दौ भावपरौ समाहारद्वन्द्वः, पूजातः पूजायामासनपरिचरणादिकायां, विषमसमे समेन सह पूजायां विषमे वैषम्ये, असमेन च समे साम्ये क्रियमाणे तदन्नमभोज्यम् (मिताक्षरा)

यद्यपि दोषवत्सु श्वपाकादिषु मूढैः तद्दोषैर्दोषवदिव विभाव्यते तथापि तद्दोषैरसंस्पृष्टम् इति निर्दोषं

दोषवर्जितम्। हि यस्मात् नापि स्व-गुण-भेद-भिन्नं[१२] निर्गुणत्वात् चैतन्यस्य।

वक्ष्यति च भगवान् इच्छादीनां क्षेत्र-धर्मत्वम्। "अनादित्वान्निर्गुणत्वात्" (गी १३.३१) इति च।

नाप्यन्त्या विशेषाः[१३] आत्मनो भेदकाः सन्ति, प्रतिशरीरं तेषां सत्त्वे प्रमाणानुपपत्तेः।

अतः समं ब्रह्म एकं च। तस्मात् ब्रह्मणि एव ते स्थिताः।

तस्मान्न दोष-गन्ध-मात्रमपि तान् स्पृशति देहादि-सङ्घातात्म-दर्शनाभिमानासम्भवात् तेषाम्।

---

12 स्वकीय-सतत्वादिगुण-भेदात् बहुविधा प्रकृतिः न तथा ब्रह्म, निर्गुणत्वात्।
13 वैशेषिकाणां विशेषाः नित्यद्रव्यवृत्तयः यैः परमाण्वादीनां मिथो भेदः सिद्ध्यति।

देहादि-सङ्घातात्म-दर्शनाभिमानवद्विषयं तु तत्सूत्रं “समासमाभ्यां विषम-समे पूजातः” इति पूजा-

विषयत्व-विशेषणात्।

दृश्यते हि ब्रह्मवित्, षडङ्गवित्, चतुर्वेदविद् इति[१४] पूजा-दानादौ गुण-विशेष-सम्बन्धः

कारणम्। ब्रह्म तु सर्व-गुण-दोष-सम्बन्ध-वर्जितमिति। अतो ब्रह्मणि ते स्थिताः इति युक्तम्।

कर्मि-विषयं च “समासमाभ्याम्” इत्यादि।

इदं तु सर्व-कर्म-संन्यास-विषयं प्रस्तुतं “सर्वकर्माणि मनसा” (गी ५.१३) इत्यारभ्य आ अध्याय-

परिसमा’ीः।। १९ ।।

[14] ब्रह्मविद् आदौ पूज्यः इति।

यस्मान्निर्दोषं समं ब्रह्मात्मा तस्मात् -

**न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम्।**

**स्थिरबुद्धिरसम्मूढः ब्रह्मविद् ब्रह्मणि स्थितः।। ५.२० ।।**

ब्रह्मणि स्थितः ब्रह्मविद् स्थिरबुद्धिः असम्मूढः प्रियं प्राप्य न प्रहृष्येत् अप्रियं प्राप्य च नोद्विजेत् । (यद्वा ब्रह्मविद् प्रियं प्राप्य न प्रहृष्येत् अप्रियं प्राप्य नोद्विजेत्। स्थिरबुद्धिरसम्मूढः च (स्यात्) (एवंविधः ब्रह्मविद् ब्रह्मणि स्थितः।) । २०

The one who knows *Brahman*, who is established in *Brahman*, whose knowledge is firm, and who is free from delusion, should (does) not rejoice over gaining that which is desirable and should (does) not resent gaining that which is undesirable.

न प्रहृष्येदिति। न प्रहृष्येत् प्रहर्षं कुर्यात् प्रियम् इष्टम् प्राप्य लब्ध्वा। नोद्विजेत् प्राप्य एव च अप्रियम्

अनिष्टं लब्ध्वा। देहमात्रात्म-दर्शिनां हि प्रियाप्रिय-प्रा’’ी हर्ष-विषाद-स्थाने[१५], न केवलात्मदर्शिनः,

तस्य प्रियाप्रिय-प्रा’’यसम्भवात्।

[15] हर्षविषादौ कुर्वाते इति पाठान्तरम्।

किञ्च सर्वभूतेष्वेकः समो निर्दोष आत्मेति स्थिरा निर्विचिकित्सा बुद्धिर्यस्य सः स्थिरबुद्धिः।

असम्मूढः सम्मोह-वर्जितश्च स्याद् यथोक्त-ब्रह्मविद् ब्रह्मणि स्थितः[१६] अकर्मकृत् सर्व-कर्म-संन्यासीत्यर्थः।। २० ।।

[16] ब्रह्मनिष्ठः न तु कर्मनिष्ठः।

किञ्च ब्रह्मणि स्थितः -

**बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखं।**

**स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते।। ५.२१ ।।**

यः बाह्यस्पर्शेषु असक्तात्मा सन् आत्मनि यत्सुखं (अस्ति) (तत्) विन्दति। ब्रह्मयोगयुक्तात्मा सः अक्षयं सुखं अश्नुते।। २१

The one whose mind is not attached to the external (sense) objects that contact (the sense organs) gains that happiness, (fullness), which is in oneself. One whose mind is endowed with the knowledge of *Brahman* gains that happiness that does not wax and wane.

बाह्येति। बाह्यस्पर्शेषु बाह्याश्च ते स्पर्शाश्च बाह्य-स्पर्शाः, स्पृश्यन्ते इति स्पर्शाः शब्दादयो विषयाः,

तेषु बाह्य-स्पर्शेषु। असक्तः आत्मान्तःकरणं यस्य सोऽयम् असक्तात्मा।

विषयेषु प्रीति-वर्जितः सन् विन्दति लभते आत्मनि यत्सुखं तद् विन्दतीत्येतत्।

स ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगः समाधिर्ब्रह्म-योगः तेन ब्रह्म-योगेन युक्तः समाहितः तस्मिन्

व्यापृत आत्मान्तःकरणं यस्य स ब्रह्म-योग-युक्तात्मा सुखम् अक्षय्यम् अश्नुते प्राप्नोति[१७]।

तस्माद् बाह्य-विषय-प्रीतेः क्षणिकाया इन्द्रियाणि निवर्त्तयेत् आत्मनि अक्षय्यसुखार्थीत्यर्थः।। २१

।।

---

17 व्याप्नोतीति वा।

इतश्च निवर्त्तयेत् -

**ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।**

**आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः।। ५.२२ ।।**

ये हि भोगाः संस्पर्शजा ते दुःखयोनय एव । आद्यन्तवन्तः च (भवन्ति) । (तस्मात्) कौन्तेय तेषु बुधः न रमते ।। २२

Because those enjoyments that are born of contact (between the sense organs and desirable objects) are the sources of pain alone, and have a beginning and an end, O son of *Kuntī*, the wise person does not revel in them.

ये हीति। ये हि यस्मात् संस्पर्शजाः विषयेन्द्रिय-संस्पर्शेभ्यो जाताः भोगाः भुक्तयः।

दुःखयोनयः एव ते अविद्या-कृतत्वात्। दृश्यन्ते हि आध्यात्मिकादीनि दुःखानि तन्निमित्तान्येव।

यथेह लोके तथा परलोकेऽपीति गम्यत एव-शब्दात्।

न संसारे सुखस्य गन्ध-मात्रमप्यस्तीति बुद्ध्वा विषय-मृगतृष्णिकाया इन्द्रियाणि निवर्त्तयेत्।

न केवलं दुःख-योनय एव, आद्यन्तवन्तः च आदिर्विषयेन्द्रिय-संयोगो भोगानाम्, अन्तश्च तद्वियोग

एव, अत आद्यन्तवन्तोऽनित्या मध्य-क्षण-भावित्वाद् इत्यर्थः।

कौन्तेय न तेषु भोगेषु रमते बुधः विवेक्यवगत-परमार्थ-तत्त्वः।

अत्यन्त-मूढानामेव हि विषयेषु रतिर्दृश्यते यथा पशु-प्रभृतीनाम्।। २२ ।।

अयं च श्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राि’हेतुः दुर्निवार्यः च इति तत्परिहारे यत्नाधिक्यं

कर्तव्यमित्याह भगवान् -

**शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात्।**

**कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः।। ५.२३ ।।**

यः इह एव शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति स युक्तः स सुखी नरः।। २३

The one who is able to master the force born of anger and desire here (in this world) before release from the body is a *karma-yogī*. He (or she) indeed is a happy person.

शक्नोतीति। शक्नोति उत्सहते इहैव जीवन्नेव यः सोढुं प्रसहितुं प्राक् पूर्वं शरीरविमोक्षणाद् आ

मरणादित्यर्थः। मरण-सीमा-करणं जीवतोऽवश्यंभावी हि काम-क्रोधोद्भवः वेगः अनन्त-

निमित्तवान् हि सः इति। यावन्मरणं तावन्न विश्रम्भणीय इत्यर्थः।

कामः इन्द्रिय-गोचर-प्रा’’ा इष्टे विषये श्रूयमाणे, स्मर्यमाणे वा अनुभूते सुख-हेतौ, या गर्धिः तृष्णा

सः कामः।

क्रोधश्चात्मनः प्रतिकूलेषु दुःख-हेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वा यो द्वेषः स क्रोधः।

तौ काम-क्रोधावुद्भवो यस्य वेगस्य स काम-क्रोधोद्भवो वेगः।

रोमाञ्चन-हृष्टनेत्र-वदनादि-लिङ्गोऽन्तःकरण-प्रक्षोभ-रूपः कामोद्भवो वेगः।

गात्र-प्रकम्प-प्रस्वेद-संदष्टौष्ठ-पुट-रक्त-नेत्रादि-लिङ्गः क्रोधोद्भवो वेगः। तं काम-क्रोधोद्भवं वेगं य

उत्सहते प्रसहते सोढुं प्रसहितुं सः युक्तः योगी सुखी चेह लोके नरः।। २३ ।।

कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्याह भगवान् -

**योन्तःसुखोऽन्तरारामः तथाऽन्तर्ज्योतिरेव यः।**

**स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति।। ५.२४ ।।**

यः अन्तःसुखः अन्तरारामः तथा यः अन्तर्ज्योतिरेव स योगी ब्रह्मभूतः सन् ब्रह्मनिर्वाणं अधिगच्छति।। २४

The one whose fulfilment is in oneself, the one who revels in oneself, the one whose mind is awake to oneself, that wise person alone, whose self is *Brahman,* gains the freedom which is *Brahman*.

य इति। यः अन्तःसुखः अन्तरात्मनि सुखं यस्य सोऽन्तःसुखः। तथा अन्तरेवात्मन्याराम आरमणं

क्रीडा यस्य सः अन्तरारामः।

तथा एव अन्तरात्मैव[१८] ज्योतिः प्रकाशो यस्य सः अन्तर्ज्योतिः एव। यः ईदृशः सः योगी

ब्रह्मनिर्वाणं ब्रह्मणि निर्वृतिं मोक्षम् इह जीवन्नेव ब्रह्मभूतः सन् अधिगच्छति प्राप्नोति।। २४ ।।

[18] तथैवान्तरेव आत्मन्येव इति पाठान्तरम्।

किञ्च -

**लभन्ते ब्रह्मनिर्वाणम् ऋषयः क्षीणकल्मषाः।**

**छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः।। ५.२५ ।।**

क्षीणकल्मषाः यतात्मानः सर्वभूतहिते रताः ऋषयः छिन्नद्वैधाः ब्रह्मनिर्वाणं लभन्ते ।। २५

Sages whose impurities have been destroyed, whose doubts have been resolved, who have self-mastery (and) who are happily engaged in the good of all beings, gain liberation.

लभन्त इति। लभन्ते ब्रह्मनिर्वाणं मोक्षम् ऋषयः सम्यग्दर्शिनः संन्यासिनः क्षीणकल्मषाः क्षीण-पापादि-दोषाः। छिन्नद्वैधाः छिन्न-संशयाः यतात्मानः संयतेन्द्रियाः सर्वभूतहिते रताः सर्वेषां भूतानां हित आनुकूल्ये रता अहिंसका इत्यर्थः।। २५ ।।

किञ्च -

**कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।**

**अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनाम्।। ५.२६ ।।**

कामक्रोधवियुक्तानां यतचेतसां यतीनां विदितात्मनां ब्रह्मनिर्वाणम् अभितो वर्त्तते ।। २६

For *sannyāsīs*, those who are free from desire and anger, whose mind is under control, (and) who know the self, there is liberation, both here and in the hereafter.

कामेति। कामक्रोधवियुक्तानां कामश्च क्रोधश्च काम-क्रोधौ ताभ्यां वियुक्तानां यतीनां संन्यासिनां यतचेतसाम् संयतान्तःकरणानाम् अभितः उभयतो जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षः वर्त्तते। विदितात्मनाम् विदितो ज्ञात आत्मा येषां ते विदितात्मनः तेषां विदितात्मनां, सम्यग्दर्शिनाम् इत्यर्थः।। २६ ।।

सम्यग्दर्शन-निष्ठानां संन्यासिनां सद्योमुक्तिरुक्ता। कर्म-योगश्चेश्वरार्पित-सर्व-भावेनेश्वरे ब्रह्मण्याधाय क्रियमाणः सत्वशुद्धि-ज्ञानप्रा'ि-सर्वकर्मसंन्यास-क्रमेण मोक्षायेति भगवान् पदे पदेऽब्रवीद्, वक्ष्यति च। अथेदानीं ध्यान-योगं सम्यग्दर्शनस्यान्तरङ्गं विस्तरेण वक्ष्यामीति तस्य सूत्र-स्थानीयान् श्लोकान् उपदिशति स्म -

**स्पर्शान् कृत्वा बहिर्बाह्यान् चक्षुश्चैवान्तरे भ्रुवोः।**

**प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ।। ५.२७ ।।**

**यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।**

**विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः।। ५.२८ ।।**

बाह्यान् स्पर्शान् बहिः कृत्वा चक्षुः च एव भ्रुवोः अन्तरे (कृत्वा) नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा यः यतेन्द्रियमनोबुद्धिः मोक्षपरायणः विगतेच्छाभयक्रोधः मुनिः सः सदा मुक्तः एव ।। २८

Shutting out the external objects and keeping the eyes between the two eyebrows, (closed), keeping the movement of the exhalation and inhalation in the nostrils equal, (rhythmic), the contemplative person, who has mastered his (or her) organs of action, senses, mind, and intellect, for whom *mokṣa* is the ultimate end, who is free from desire, fear, and anger, that person is always liberated indeed.

स्पर्शानिति। स्पर्शान् शब्दादीन् कृत्वा बहिर्बाह्यान्।

श्रोत्रादि-द्वारेणान्तर्बुद्धौ प्रवेशिताः शब्दादयो विषयाः तान् अचिन्तयतो बाह्या बहिरेव कृता भवन्ति।

तानेवं बहिः कृत्वा। चक्षुश्चैवान्तरे भ्रुवोः, “कृत्वा” इत्यनुषज्यते।

तथा प्राणापानौ नासाभ्यन्तरचारिणौ समौ कृत्वा।। २७ ।।

यतेन्द्रियमनोबुद्धिः यतानि संयतानि इन्द्रियाणि मनो बुद्धिश्च यस्य स यतेन्द्रिय-मनो-बुद्धिः मननाद् मुनिः संन्यासी मोक्षपरायणः एवं देह-संस्थानो मोक्ष-परायाणः मोक्ष एव परमयनं परा गतिर्यस्य सोऽयं मोक्ष-परायाणो मुनिर्भवेत्।

विगतेच्छाभयक्रोधः इच्छा च भयं च क्रोधश्च इच्छा-भय-क्रोधाः ते विगता यस्मात् स विगतेच्छा-भय-क्रोधः यः एवं वर्त्तते सदा संन्यासी मुक्त एव सः। न तस्य मोक्षोऽन्यः कर्त्तव्योऽस्ति।। २८ ।।

एवं समाहित-चित्तेन किं विज्ञेयमित्युच्यते -

**भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।**

**सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति।। ५.२९ ।।**

यज्ञतपसां भोक्तारं सर्वलोकमहेश्वरम् सर्वभूतानां सुहृदं मां ज्ञात्वा (योगी) शान्तिम् ऋच्छति ।। २९

Knowing Me as the sustainer of rituals and disciplines, the Lord of all the worlds, friend of all beings, he (or she) gains peace (liberation).

भोक्तारमिति। भोक्तारं यज्ञतपसां यज्ञानां तपसां च कर्तृ-रूपेण देवता-रूपेण च सर्व-लोकमहेश्वरम् सर्वेषां लोकानां महान्तमीश्वरं सर्व-लोक-महेश्वरम् सुहृदं सर्वभूतानां सर्व-प्राणिनां प्रत्युपकार-निरपेक्षतयोपकारिणं, सर्वभूतानां हृदये-शयं, सर्व-कर्म-फलाध्यक्षं, सर्व-प्रत्यय-साक्षिणं मां नारायणं ज्ञात्वा शान्तिं सर्व-संसारोपरतिम् ऋच्छति प्राप्नोति।। २९।।

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सन्न्यासयोगो नाम पञ्चमोऽध्यायः।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये पञ्चमोऽध्यायः।।